# তুলসী পূজা

{॥ তুলসী পূজা ॥}

॥অথ তুলসী পূজা প্রারংভঃ॥

॥শ্রীগণেশায নমঃ॥

॥অথ তুলসীপূজনং লিখ্যতে॥

শ্রীমহাদেব উবাচ॥

শুভে পক্ষে শুভে বারে শুভে ঋক্ষে শুভোদযে ।

কেশবার্থে শুভাংশে চ রোপযেত্তুলসীং মুনিঃ ॥১॥

গৃহস্থো গৃহমধ্যে বা গৃহস্থোপবনেপি বা ।

শুচৌ দেশে তু তুলসীমর্চ্চযেদ্বুদ্ধিমান্নরঃ ॥২॥

মূলে চ বেদিকাং কৃত্বা আলবালসমন্বিতাম্ ।

প্রাতঃসংধ্যাবিধিং কৃত্বা স্নানপূর্বং দিনে দিনে ॥৩॥

গাযত্র্যষ্টজপং কৃত্বা তুলসীং পূজযেত্ততঃ ।

প্রাঙ্মুখোদঙ্মুখো বাপি স্থিত্বা প্রযতমানসঃ ॥৪॥

ধ্যাযেচ্চ তুলসীং দেবীং শ্যামাং কমললোচনাম্

প্রসন্নপদ্মকল্হারবরাভযচতুর্ভুজাম্ ॥৫॥

কিরীটহারকেযূরকুংডলাদিবিভূষিতাম্ ।

ধবলাংশুকসংযুক্তাং পদ্মাসননিষেদুষীম্ ॥৬॥ ইতি ধ্যানম্॥

দেবি ত্রৈলোক্যজননি সর্বলোকৈকপাবনি ।

আগচ্ছ ভগবত্যত্র প্রসীদ তুলসি দ্রুতম্ ॥৭॥ আবাহনম্॥

সর্ব দেবময়ে দেবি সর্বদা বিষ্ণুবল্লভে ।

রত্নস্বর্ণময়ং দিব্যং গৃহাণাসনমব্যয়ে ॥৮॥ আসনম্॥

সর্বদেবময়াকারে সর্বদেবনমোঽস্তুতে ।

পাদ্যং গৃহাণ দেবেশি তুলসি ত্বং প্রসীদ মে ॥৯॥ পাদ্যম্॥

সর্ব দেবময়াকারে সর্বাংগমণিশোভিতে ।

ইদমর্ঘংগৃহানত্বং দেবি দৈত্যাংন্তকপ্রিয়ে ॥১০॥ অর্ঘ্যম্॥

সর্বলোকস্য রক্ষার্থং সদা সংনিধিকাররিণি॥

গৃহাণ তুলসি প্রীত্যা ইদমাচমনীয়কং ॥১১॥ আচমনম্॥

গংগাদিভ্যো নদীভ্যশ্চ সমানীতমিদং জলম্ ।

স্নানার্থং তুলসি স্বচ্ছং প্রীত্যা তৎপ্রতিগৃৎদ্যতাম্ ॥১২॥ স্নানম্॥

ক্ষিরোদমথনোদ্ভূতে চংদ্রলক্ষ্মীসহোদরে ।

গৃৎদ্যতাং পরিধানার্থমিদং ক্ষৌমাংবরং শুভে ॥১৩॥ বস্ত্রম্॥

শ্রীগংধং কুংকুমং দিব্যং কর্পূরাগরুসংযুতম্ ।

কল্পিতং তে মহাদেবি প্রীত্যর্থং প্রতিগৃৎদ্যতাম্ ॥১৪॥ গংধম্॥

নীলোৎপলং তু কল্হারমালত্যাদীনি শোভনে ।

পদ্মাদিগংধবংতীনি পুষ্পাণি প্রতিগৃৎদ্যতাম্ ॥১৫॥ পুষ্পম্॥

ধূপং গৃহাণ্ দেবেশি মনোহারি সগুগ্গলম্ ।

আজ্যমিস্রং তু তুলসি ভক্তাভিষ্টপ্রদাযিনি ॥১৬॥ ধূপম্॥

অজ্ঞানতিমিরাংধস্য জ্ঞানদীপপ্রদাযিনী ।

ত্বযা তু তুলসি প্রিতা দীপোযং প্রতিগৃৎদ্যতাম্ ॥১৭॥ দীপম্ ।

নমস্তে জগতাং নাথে প্রাণিনাং প্রিযদর্শনে ।

যথাশক্তি মযা দত্তং নৈবেদ্যম্ প্রতিগৃৎদ্যতাম্ ॥১৮॥ নৈবেদ্যম্॥

নমো ভগবতে শ্রেষ্ঠে নারযনজগন্মযে ।

তুলসি ত্বরযা দেবি পানীযং প্রতিগৃৎদ্যতাম্ ॥১৯॥ পানীযম্॥

অমৃতেমৃতসংভূতে তুলস্যমৃতরূপিণি ।

কর্পূরাদিসমাযুক্তং তাংবূলং প্রতিগৃৎদ্যতাম্ ॥২০॥ তাংবূলম্॥

দক্ষিণা দক্ষিণকরে ত্বদ্ভক্তানাং প্রিযংকরি ।

করোমি তে সদা ভক্ত্যা বিষ্নুকাংতে প্রদক্ষিণাম্ ॥২১॥

নমো নমো জগদ্ধাত্র্যৈ জগদাদ্যৈ নমো নমঃ ।

নমো নমো জগদ্ভূত্যৈ নমস্তে পরমেশ্বরি ॥২২॥

প্রসীদ মম দেবেশি কৃপযা পরযা সদা ।

অভিষ্টফলসিদ্ধ্যর্থ কুরু মে মাধবপ্রিযে ॥২৩॥

ইত্যেবমর্চ্চযেন্নিত্যং প্রাতরেব শুচির্নরঃ ।

মধ্যাহ্নে বাথ সাযাহ্নে পূজযেৎপ্রযতো নরঃ ॥২৪॥

॥ইতি তুলসীপূজাসম্পূর্ণা॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Tulasi Puja Lyrics in Bengali PDF
% File name : tulasipujaa.itx
% Category : pUjA
% Location : doc_deities_misc
% Author : shiva
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)
% Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)
% Translated by : (not translated)
% Latest update : August 25, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website